# पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिभाषायाः महाभाष्यदृष्ट्या अनुशीलनम्

<u>कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य</u>

<u>व्याकरण-विभागे विद्यावारिधि इत्युपाधयेः समर्पितः</u>

**<u>शोधप्रस्तावः</u>**


संशोधिका

मृणाल अ. फडणवीस

मार्गदर्शकः

प्रो. हरेकृष्ण अगस्ती

व्याकरणविभागाध्यक्षः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः,

रामटेकम् , महाराष्ट्रम्


२०२१-२०२२

# विषयसूची

१ . प्रस्तावना .......................................................................... ३

२ . संशोधनोद्देश्यानि .....................................................................४

३ . शोधपद्धतिः ............................................................................ ४

४ . पूर्वसंशोधनम् ......................................................................... ४

५ . विषयस्य प्रयोजनम् ................................................................. ५

६ . व्याप्तिः मर्यादा च ..................................................................... ६

७ . अध्यायविभागः ........................................................................ ६

८ . सन्दर्भग्रन्थसूची ...................................................................... ८

९ . पूर्वसंशोधनस्त्रोतसां सन्दर्भसूची.................................................. १०

१०.अभ्यर्थना.................................................................................११

## १ . प्रस्तावना -

भाषा हि जनानां भावाभिव्यक्तये सशक्तं साधनम्। संस्कृतभाषा तु विश्वस्य प्राचीनतमा भाषा वर्तते। इयमेव देवभाषा सर्वविधभाषाणां जननी अस्ति। भाषा स्वव्याकरणेन जनानां संस्कारप्रदायिनी भवति। भाषायाः शुद्धये व्याकरणस्य अपेक्षा भवति एव। व्याक्रियन्ते व्युत्पाद्यन्ते विशोध्यन्ते शब्दाः अनेनेति व्याकरणम् (कृधातोः करणे ल्युट् प्रत्ययः) अर्थात् शब्दव्युत्पादकं शास्त्रं व्याकरणं कथ्यते। भाषाविज्ञानस्य सुचारुज्ञानाय भाषायाः व्याकरणस्य च ज्ञानमावश्यकम्। यथोक्तं दण्डिना –

"इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दिप्यते।।"

व्याकरणं हि वेदपुरुषस्य मुखं स्मृतम्। तथापि सत्स्वपि बहुषु व्याकरणग्रन्थेषु पाणिनीयव्याकरणं सर्वत्राङ्गीक्रियते। पाणिनीयव्याकरणं 'अष्टाध्यायी' इति नाम्ना सूत्रकारेण प्रसिद्धमस्ति। पाणिनेः सूत्राणां योग्यसमन्वयाय वार्तिककारेण कात्यायनेन वार्तिकानि रचितानि। यत्र उक्तानुक्तदुरुक्तानां चिन्ता क्रियते। भगवान् पतञ्जलिः द्वयोः विस्तृतां व्याख्यां महाभाष्ये कृतवान्। महाभाष्यं हि पाणिनीयव्याकरणस्य प्रामाणिको व्याख्याग्रन्थः। संस्कृतव्याकरणक्षेत्रे पातञ्जलमहाभाष्यस्य स्थानं महत्वपूर्णं वर्तते। एतस्य ग्रन्थस्य कैयटनाम्ना वैयाकरणेन 'प्रदीप' इति टीका लिखिता। तस्योपरि नव्यवैयाकरणेषु मूर्धन्यः नागेश भट्टेन 'उद्योत' नाम्नी टीका लिखिता अस्ति।

संस्कृतव्याकरणशास्त्रे महाभाष्यमिव, महत्त्वपूर्णं स्थानं परिभाषाणामपि वर्तन्ते। अमरकोषे 'यः सनिन्द उपालम्भस्तवस्यातत्परिभाषणम्' इति परिभाषा शब्दार्थः प्रदीयते। परं प्रस्तुतसन्दर्भे परिभाषा शब्दः न यौगिकः, अपितु रूढः। व्याकरणशास्त्रे बहवः आचार्याः विपुलं साहित्यं निर्माय परिभाषासाहित्यं समृद्धं चक्रुः। परितो भाषते या सा परिभाषा अथवा अनियमे नियमकारिणी परिभाषा इत्यपि कथ्यते। पाणिनीय व्यतिरिक्तानां परिभाषाणां प्रामाण्यं ज्ञापकसिद्धत्वेन, न्यायसिद्धत्वेन, वाचनिकत्वेन च व्याकरण सम्प्रदाये अङ्गीक्रियते इति बोध्यम्।

## २ . संशोधनोद्देश्यानि –

व्याकरणशास्त्रे परिभाषामधिकृत्य बहवो ग्रन्थाः नानाचार्यप्रणीताः सन्ति। तेषु नागेशभट्टकृतः 'परिभाषेन्दुशेखरः' इति ग्रन्थः परिभाषाजगति प्रमाणभूतः। सर्वस्यापि व्याख्याजालस्य व्याकरणशास्त्रे महाभाष्यमूलत्वं सर्वविदितम्। सर्वोऽपि ग्रन्थकृत् स्वलेख्याशयस्य भाष्यालिङ्गितत्वमेवाशेरते। येन प्रसिध्यति महाभाष्यस्य महत्वपूर्णता। पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः परिभाषायाः महाभाष्यदृष्ट्या अनुशीलनम् इति शीर्षकमादाय इमानि कार्याणि कर्तुमीह्यन्ते –

१ . परिभाषास्थपदानां महाभाष्यदृष्ट्या सम्यगध्ययनम्।

२ . परिभाषास्थपदानां विषये आगतानां न्यायानां विचारः।

३ . परिभाषास्थपदानां विषये आगतानां सूत्राणां विचारः, बलवत्वनिर्णायकहेतूनां विमर्शश्च।

## ३ . शोधपद्धतिः –

एतावता 'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषायाः महाभाष्यदृष्ट्या अनुशीलनं जातं नास्ति । अस्मिन् संशोधने अनुशीलनात्मिका पद्धतिरवलम्ब्यते । प्रथमं परिभाषायाः भाष्ये प्रदत्तानां ज्ञापकतत्वानामध्ययनं करिष्यते, ततः परनित्यादिन्यायानां भाष्ये क्व समुल्लेखः इति सङ्कलनं करिष्यते, तेषां नियमानां बलवत्वादि विमर्शपूर्वकानुशीलनं कृत्वा अध्ययानुसारं वर्गीकरणं च कृत्वा निर्दिष्टपध्दत्या लिख्यते।

## ४ . पूर्वसंशोधनम् –

१ . परिभाषाव्याख्याने नीलकण्ठदीक्षितः तथा नागेशभट्टयोः मतभेदविमर्शः,

Kandpal, Naveen Chandra,1992, Ph.D,

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha

अस्मिन् शोधप्रबन्धे परिभाषाविषयकग्रन्थेषु परिभाषावृत्तेः परिभाषेन्दुशेखरस्य च स्थानम्, परिभाषानां व्याख्याने नीलकण्ठदीक्षितः-नागेशभट्टयोः मतभेदविमर्शः, मतभेदस्याधारः, मत्यैकस्थलानि इत्यादिविषयाः चर्चिताः।

२. वैयाकरणसिद्धान्तकौमुद्यामुपन्यस्तानां वार्तिकानां महाभाष्यदृष्ट्या ससन्दर्भ साम्यासाम्यविमर्शः,

Sharma, Gunprakash, 2008, Ph.D,

Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha

अस्मिन् शोधप्रबन्धे परिभाषाणां तथा वार्तिकानां विषये आगतानां सूत्राणां चर्चा वर्तन्ते। परिभाषावार्तिकयोर्मध्ये आगतानां साम्यस्थलानां, भेदस्वरूपविषये विचारः कृतः।

३. A critical study of some aspects of Sanskrit grammar with special reference to the mahabhashya of patanjal,

Mishra Harideo, 1960, Ph.D,

Savitribai Phule Pune University,Pune

अस्मिन् शोधप्रबन्धे चतुर्थाध्याये परिभाषाविषये विचाराः वर्तन्ते। महाभाष्ये परिभाषाविषये उल्लेखितानि सूत्राणि, ज्ञापकानि इत्यादिनामिह विवेचनं वर्तन्ते।

४ . पातञ्जल महाभाष्य का दार्शनिक अनुशीलन,

Singh Ritu, 2008, Ph.D,

V.B.S. Purvanchal University

अस्मिन् शोधप्रबन्धे तृतीय तथा चतुर्थाध्याये व्याकरणस्य दार्शनिकाधारः, शब्दसम्बन्धी पदसम्बन्धी अर्थसम्बन्धी दार्शनिकविचारः, न्यायानां विचारः वर्तन्ते।

इमे विषयाः मम शोधस्य विषयदार्ढ्यस्य महाभाष्यावगमसौकर्यस्य च सोपानानि भवन्तीति एतेषां परिशीलनं कृत्वा भाष्यस्य योग्यमध्ययनं विधाय विषयविमर्शः क्रियते।

## ५. विषयस्य प्रयोजनम् –

परिभाषाविषयकसिद्धान्तानां समीक्षार्थं आचार्यनागेशभट्टैः परिभाषेन्दुशेखरः इति ग्रन्थः विनिर्मितः। परिभाषेन्दुशेखरः पाणिनीयव्याकरणसम्बन्धपरिभाषाणां व्याख्या।

अत्र ही १३३ परिभाषाः सङ्कलिताः सन्ति। इमाः १३३ परिभाषाः त्रिषु भागेषु वर्णिताः सन्ति। १. शास्त्रसम्पन्नोदेशः २. बाधबीजः ३. शास्त्रशेषः इति। एतेषु प्रकरणेषु बाधबीजनामके द्वितीये प्रकरणे

विद्यमाना प्रथमा परिभाषा वर्तते – पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति। अस्यां परिभाषायां ये बिन्दवः सन्ति तान् अनुसृत्य सम्पूर्णस्य महाभाष्यस्य अनुशीलनं मया क्रियते। परिभाषागतानां पदानां सम्यगध्ययनं तत्रस्थविचारेषु साम्यस्थलानां, पदानां विषये आगतानां न्यायानां, बलवत्वनिर्णायकहेतूनाम् अनुशीलनम् आवश्यकं भाति। परिभाषा तथा महाभाष्यज्ञानस्य लिप्सूनां कृते शोधविषयः अयं लाभाय भवति।

## ६ . व्याप्तिः मर्यादा च –

आचार्य नागेशभट्टैः विरचिते 'परिभाषेन्दुशेखरः' नामके ग्रन्थे १३३ परिभाषाः सन्ति। एतासां परिभाषाणां अनुशीलनेऽस्मिन् विषये व्याप्तिः दृश्यते यदत्र केवलं बाधबीजप्रकरणस्था पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति एकामेव परिभाषामाधारीकृत्य तस्याः महाभाष्यदृष्ट्या अनुशीलनं क्रियते। शोधविषये मम प्रधानग्रन्था महाभाष्यमेव वर्तते। भाष्यप्रसङ्गानां उद्धरणं कृत्वा भाष्याशयावगमनाय प्रदीपव्याख्यावलम्बनं कृत्वा तदाधारेण सिद्धान्तस्य विश्लेषणम् अत्र विवक्षितम्।

## ७ . अध्यायविभागः –

१. **प्रस्तावना**

२. **प्रथमोऽध्यायः** –

पाणिनीयव्याकरणसम्प्रदायपरिचयः। परिभाषाणां स्वरूपम्, परिभाषाणां प्रकाराः, पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिभाषायाः प्रसिद्धपरिभाषाग्रन्थकर्तृणां मतोल्लेखः परिभाषामहत्वविषयकचर्चा चात्र भविष्यति।

३. **द्वितीयोऽध्यायः – परसूत्राणां बलवत्त्वानुशीलनम्।**

पूर्वशास्त्रापेक्षया परशास्त्रस्य बलवत्वं अस्मिन् प्रकरणे प्रस्तूयते। विप्रतिषेधस्वरूपचिन्तनं विधाय, परबलवत्वं कथं निर्धार्यते इत्यस्मिन् विषये आगतानां प्रसङ्गानां विचारः अत्र क्रियते।

पूर्वशास्त्रापेक्षया परशास्त्रं बलवद्भवति इत्यस्य उदाहरणं वर्तते "वृक्षेभ्यः" इति। तत्र

वृक्ष+भ्यस् इति जाते यत्रादौ 'सुपि च'(७-३-१०२) इत्यनेन दीर्घः तथा 'बहुवचने झल्येत्'(७-३-१०३) इत्यनेन एत्वं च युगपत् प्राप्यते। तस्मात् एतयोः शास्त्रयोः समबलवत्वं सम्पन्नम्। अनयोः एकत्र लक्ष्ये "वृक्षेभ्य" इत्यत्र युगपत् प्राप्तयोः तुल्यबलविरोधे सति 'बहुवचने झल्येत्' इति शास्त्रं परत्वात् 'सुपि च' इति शास्त्रस्य बाधः भवति।

## ४. तृतीयोऽध्यायः – नित्यसूत्राणां बलवत्त्वानुशीलनम्।

परशास्त्रापेक्षया नित्यशास्त्रस्य बलवत्वं अस्मिन् प्रकरणे प्रस्तूयते।

नित्यं बहुविधं प्रदर्शते। तत्र अत्यन्तं प्रबलं नित्यलक्षणं किम्, क्व भाष्यस्य अनुग्रहः इति विचारः प्रस्तूयते।

परशास्त्रापेक्षया नित्यशास्त्रं बलवद्भवति इत्यस्य उदाहरणं वर्तते "तुदति" इति। तत्र 'तुदादिभ्यः शः'(३-१-७७) इत्यनेन शप्रत्ययः तथा 'पुगन्तलघूपधस्य च'(७-३-८६) इति लघूपधगुणश्च युगपत् प्राप्यते। तत्र लघूपधगुणः यद्यपि परस्तथापि लघूपधगुणे कृतेऽकृते च शप्रत्ययः प्रवर्तते, अतः सः नित्यः। शप्रत्यये कृते तु लघूपधगुणो न प्रवर्तते, शप्रत्ययस्य ङित्त्वात् तस्मिन् परे 'क्ङिति च'(१-१-५) इति गुणनिषेधात्। तस्मात् परमपि लघूपधगुणं बाधित्वा नित्यात्वात् शप्रत्ययो भवति।

## ५. चतुर्थोऽध्यायः - अन्तरङ्गसूत्राणां बलवत्त्वानुशीलनम्।

नित्यशास्त्रापेक्षया अन्तरङ्गशास्त्रस्य बलवत्वं अस्मिन् प्रकरणे प्रस्तूयते।

किम् अन्तरङ्गम् इत्यस्मिन् विषये आगतानां प्रसङ्गानाम् उद्धरणं कृत्वा अन्तरङ्गस्वरूपनिश्चयः, तस्य बाधकता निर्णयः चात्र भाष्याधारेण क्रियते।

नित्यशास्त्रापेक्षया अन्तरङ्गशास्त्रं बलवद्भवति इत्यस्य उदाहरणं वर्तते "उभये देवमनुष्यः"

इति। तत्र परत्वात् 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च'(१-१-३३) इत्यनेन विकल्पेन सर्वनामसंज्ञा प्राप्नोति। एवमेव 'सर्वादीनी सर्वनामानि'(१-१ -१७) इत्यनेन नित्या सर्वनामसंज्ञा प्राप्नोति। सर्वनामसंज्ञा विभक्तिनिरपेक्षा अन्तरङ्गा। अतः अन्तरङ्गत्वात् 'सर्वादीनी सर्वनामानि' इति सूत्रं परमपि 'प्रथमचरमतयाल्पार्धकतिपयनेमाश्च' इति सूत्रं बाधित्वा पूर्वं प्रवर्तते।

## ६. पञ्चमोऽध्यायः – अपवादसूत्राणां बलवत्त्वानुशीलनम्।

अत्र अपवादस्य बलवत्वे कारणस्य विचारः भाष्यानुसारेण क्रियते।

१.तक्रकौण्डिन्यन्यायः २.माठरकौण्डिन्यन्यायः इति न्यायद्वयस्य आधारेण बाधकापवादयोः विषये भेदः कः इति च विचार्यते।

अन्तरङ्गशास्त्रापेक्षया अपवादशास्त्रं बलवद्भवति इत्यस्य उदाहरणं वर्तते "दध्ना" इति। तत्र दधि+टा इति स्थिते अनङ्गादेशः कर्तव्यः। 'ङिच्च'(१-१-५३) इत्यनेन अन्त्यस्यालः प्राप्नोति। 'अनेकाल्शित्सर्वस्य'(१-१-५५) इत्यनेन सर्वस्य प्राप्नोति। अस्यामवस्थायां परमपि 'अनेकाल्शित्सर्वस्य' इति सर्वादेशं 'ङिच्च' इति अपवादत्वात् बाधित्वा पूर्वं प्रवर्तते।

## ७. उपसंहारः –

**समेषां प्रकरणानां चिन्तनस्य सारः** उपसंहाररूपेण भविष्यति।

- निष्कर्ष – पुर्वोत्तरपक्षादी विमर्षेन् सिद्धान्तानां अनुशीलनेन संशोधनेनानेन उपलब्ध विचारः निष्कार्षत्वेन भविष्यति।

## ८ . सन्दर्भग्रन्थसूची –

**१. 'वैयाकरणसिद्धान्तकौमुदी' ,**

श्री.गोविन्दाचार्य,श्रीमद्भट्टोजिदीक्षितविरचिता,

श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता।

चौखम्बा सुरभारती प्रकाशन,वाराणसी

२. **'संस्कृत व्याकरण का उद्भव और विकास'**,

आचार्य सत्यकाम वर्मा,

मोतीलाल बनारसी दास, जवाहरनगर दिल्ली

३. **'परिभाषेन्दुशेखर-बृहत्छास्त्रार्थकला,**

पं.वेणीमाधव शास्त्री,

चौखम्बा संस्कृत सीरिज आफ़िस, वाराणसी

४. **'व्याकरणशास्त्र का इतिहास'**,

श्री. युधिष्ठिरमीमांसकः,

रामलाल कपूर ट्रस्ट बहालगड् सोनीपत,हरियाणा

५. **'परिभाषेन्दुशेखरः'** ,

व्याख्या. आचार्य विश्वनाथ मिश्र ,

सुबोधिनी हिन्दी व्याख्या,

चौखम्बा सुरभारती प्रकाशन, वाराणसी

६. **'अमरकोष'**,

रामाश्रमीभानुदिक्षितः,

तारा पब्लिकेशन्स,वाराणसी

७. **'व्याकरणमहाभाष्यम्'**,

महर्षिपतञ्जलिः,

व्याख्या.श्री.मधुसूदनप्रसाद मिश्र,

चौखम्बा विद्याभवन, वाराणसी

८. **महर्षि पतञ्जलिकृत 'व्याकरणमहाभाष्य'**,

व्याख्या. म. म. वासुदेवशास्त्री अभ्यंकर

मराठी अनुवाद,

डेक्कन एज्युकेशन सोसायटी,पुणे.

## ९ . पूर्वसंशोधनस्त्रोतसां सन्दर्भसूची –

१ .कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य ग्रन्थालयः ।

२ अन्तर्जालीयस्त्रोतांसि

https://shodhganga.inflibnet.ac.in

http://shodhgangotri.inflibnet.ac.in

## १०. अभ्यर्थना –

"पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषायाः महाभाष्यदृष्ट्या अनुशीलनं " इतीदमनुसन्धानं व्याकरणशास्त्रे नूतनतत्त्वान्वेषणे महदुपयुक्तं भवति। ईदृशमनुसन्धानं न केनापि इतः पूर्वं विहितम्। अतः प्रो. हरेकृष्ण अगस्तीमहोदयानां मार्गदर्शने करिष्यमाणाय एतस्मै अनुसन्धानाय अनुमतिं प्रदाय मामनुगृह्णन्त्विति प्रार्थये।

संशोधिका<br>मृणाल अ. फडणवीस

मार्गदर्शकः<br>प्रो. हरेकृष्ण अगस्ती<br>व्याकरणविभागाध्यक्षः